# Moksha Gita

# મોક્ષગીતા

## Document Information

Text title : The Moksha Gita by Swami Sivananda

File name : mokShagItA.itx

Category : giitaa, gItA

Location : doc_giitaa

Author : Swami Sivananda

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : See corresponding stotram

Latest update : August 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 17, 2022

*sanskritdocuments.org*

# Moksha Gita

## મોક્ષગીતા

### ૧ સત્યશોધનમ્

Chapter I THE SEARCH FOR TRUTH

શિષ્ય ઉવાચ ।
ભગવન્ કરુણાસિન્ધો નમામિ ત્વામહં ગુરો ।
ત્વમેવાર્હસિ મે દુઃખં ભેત્તું ધ્વાન્તં યથા રવિઃ ॥ ૧॥

સંસારસાગરે ઘોરે પતનાન્નષ્ટચેતનમ્ ।
તાપત્રયેણ નિર્દગ્ધં સન્ત્રાયસ્વ ચ માં પ્રભો ।
યથા સન્તરણીયોઽયં ભવાબ્ધિઃ શાધિ માં તથા ॥ ૨॥

ગુરુરુવાચ ।
મા ભૈષીર્વત્સ તે નાસ્તિ તત્ત્વતો મરણં ધ્રુવમ્ ।
ઉપાયશ્ચાસ્તિ સંસારસાગરોત્તરણે તથા ॥ ૩॥

અમૃતત્વસ્ય સમ્પ્રાપ્તૌ પરમાનન્દભોજને ।
અતસ્ત્વામુપદેક્ષ્યામિ બ્રહ્મવિદ્યામિમાં શ ૃણુ ॥ ૪॥

ઇતિ પ્રથમોઽધ્યાયઃ સમ્પૂર્ણઃ ।

### ૨ બ્રહ્મસ્વરૂપમ્

Chapter II The Nature of Brahman

ગુરુરુવાચ ।
અનાદ્યન્તાય શાન્તાય શુદ્ધાયાઽઽત્મપ્રકાશિને ।
આદ્યાચાર્યાય નિર્ધૂતકલ્મષાયાવિકારિણે ॥ ૧॥

અદેશકાલકામાય સચ્ચિદાનન્દરૂપિણે ।
અખણ્ડશાશ્વતશ્રેષ્ઠનિર્ગુણબ્રહ્મણે નમઃ ॥ ૨॥

પ્રાણેન્દ્રિયમનોદેહજગતામાશ્રયો હિ યત્ ।
વેદયોનિસ્તથા સર્વવ્યાપકં સર્વહૃદ્ગૃહમ્ ॥ ૩॥

અવર્ણરસગન્ધં ચ નામરૂપવિવર્જિતમ્ ।
તત્તત્ત્વં પરમં કિઞ્ચિત્સાધુ શશ્વત્પ્રકાશતે ॥ ૪॥

અનશ્વરમજં ભીતિક્ષયસઞ્ચારવર્જિતમ્ ।
અનિર્વાચ્યં પરં તત્ત્વમપ્રમેયં ચ કિઞ્ચન ।
પુરાણમદ્વિતીયં યત્તજ્જાગાર્યેવ નાપરમ્ ॥ ૫॥

યન્ન હ્રસ્વં ન વા દીર્ઘં નાપીયત્તાવદેવ નો ।
ન કૃષ્ણં નાપિ વા શુક્લં ન સ્થૂલં નાપિ વા કૃશમ્ ।
ન સાધુ વા ચાસાધુ તદ્બ્રહ્મેતિ વિબુધ્યતામ્ ॥ ૬॥

યન્ન સૂક્ષ્મં ન વા સાન્દ્રં યસ્ય જાતિર્ન નામ વા ।
વિદેહમમરં યચ્ચાનવાઙ્મનસગોચરમ્ ।
યચ્ચ નૈતિ વિપર્યાસં તદ્બ્રહ્મેતિ વિબુધ્યતામ્ ॥ ૭॥

સ્થૂલસૂક્ષ્મશરીરાભ્યાં તથા કારણવિગ્રહાત્ ।
ભિન્નં હ્રહ્મ સદા મુક્તં ગતિકર્મવિવર્જિતમ્ ॥ ૮॥

અનિર્વાચ્યં ખલુ બ્રહ્મ યતો નિર્વચનં વિદુઃ ।
નિરાકરણમસ્યૈવ નિષેધાલિર્ન નેત્યતઃ ॥ ૯॥

સમર્થં કેવલં તસ્ય બ્રહ્મણો હિ નિરૂપણમ્ ।
શ્રુતિશીર્ષમિમં માર્ગં હેતોરસ્માત્સમશ્નુતે ॥ ૧૦॥

ઇતિ દ્વિતીયોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૩ માયાસ્વરૂપમ્

Chapter III The Nature of Maya

ગુરુરુવાચ ।
માયાં નામેશ્વરસ્યાહુરુપાધિં બ્રહ્મણસ્તુ સા ।
સ્વકીયેન વિભર્ત્યદ્ધા લીલામાશ્ચર્યકારિણી ॥ ૧॥

સેયં માયાઽસતી નૈવ યતો નઃ પ્રતિભાસતે ।
સતીયં નાપિ યજ્જ્ઞાનોદયે નશ્યતિ સત્વરમ્ ॥ ૨॥

એવં માયા હિ તચ્છબ્દવાચ્યા નૈવ પ્રકીર્ત્યતે ।
સૈષાઽનિર્વચનીયં હિ ભાનં કિઞ્ચન કથ્યતે ॥ ૩॥

સા માયા વર્ણનાતીતા સદસદ્ભ્યાં વિલક્ષણા ।
અનિર્વાચ્યોચ્યતે નૂનમનાદિર્ભાવરૂપયોઃ ॥ ૪॥

અનાદિરપિ સાન્તેયમૃષેરેવાત્મવેદિનઃ ।
શુદ્ધસત્ત્વસ્વરૂપાં તાં માયામાહુર્મનીષિણઃ ॥ ૫॥

માયાં વિજિત્ય યો મર્ત્ય આત્મજ્ઞાનં તુ વિન્દતે ।
સ એવ પ્રભવેત્તસ્યા જ્ઞાતુમુત્થાનસંલયૌ ॥ ૬॥

વિષયા પઞ્ચ ભૂતાનિ તન્માત્રાણ્યવધારય ।
ઉત્પાદીનીતિ માયાયા વિકારા વેતિ તત્ત્વતઃ ॥ ૭॥

ધૂમેન મનુજૈઃ સત્તા યથાગ્નેરનુમીયતે ।
તથા સત્તા ચ માયાયાસ્તન્નાનાવ્યક્તિભિર્નનુ ॥ ૮॥

માયા મનોમયી પ્રોક્તા યા સૃજત્યસકૃદ્ભ્રમાન્ ।
નાનારૂપાંશ્ચ સર્વત્ર સર્વં વ્યાપ્નોતિ નિશ્ચિતમ્ ॥ ૯॥

યદા તે નિહતં ચિત્તં સવિચારવિવેચનૈઃ ।
તદાપ્રભૃતિ માયા ત્વાં પીડયત્યેવ નો દૃઢમ્ ॥ ૧૦॥

વિષયાન્ ભોક્તુકામં તન્માયાબીજં સ્મૃતં મનઃ ।
અતો મનો નિહન્તવ્યં તત્પ્રણાશાય સુવ્રતઃ ।
અધિગત્ય પરાં શાન્તિં બ્રહ્મજ્ઞાનં તદૈષ્યસિ ॥ ૧૧॥

ઇતિ તૃતીયોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૪ અવિદ્યાસ્વરૂપમ્

Chapter IV The Nature of Avidya

ગુરુરુવાચ ।
અવિદ્યા મલિનં સત્ત્વં જીવાત્મોપાધિરુચ્યતે ।
તસ્ય કારણમૂર્તિઃ સા કોશશ્ચાનન્દતુન્દિલઃ ॥ ૧॥

અવિદ્યા સ્યાદસદ્બોધો યેન જીવોઽવગચ્છતિ ।
અજ્ઞો બુદ્ધિં તનું શુદ્ધાં સુખયોનિં ચ શાશ્વતીમ્ ॥ ૨॥

સ્વેચ્છયા ચ યથા રાજા નાટકે ભિક્ષભૂમિકામ્ ।
આધત્તે સચ્ચિદાનન્દબ્રહ્માયં જીવભૂમિકામ્ ।
જગન્નાટકરઙ્ગેઽસ્મિંસ્તથા લીલાકુતૂહલાત્ ॥ ૩॥

પાણ્ડુરં પુરુષો વસ્તુ કામલાપીડિતો યથા ।
પીતં પશ્યત્યવિદ્યાતસ્તથાઽઽત્માનં સ વિગ્રહમ્ ॥ ૪॥

આત્મબોધોદ્ગમે તાત સૈવાઽવિદ્યા વિનશ્યતિ ।
અતોઽવિદ્યા વિનાશો હિ બ્રહ્માસ્પદમુદીર્યતે ॥ ૫॥

યથાઽઽદર્શો મલેનાન્ધ્યં યાતિ તદ્વદવિદ્યયા ।
બ્રહ્માઽઽવૃતં તતો મર્ત્યા વિમુહ્યન્તિ મુહુસ્તયા ॥ ૬॥

ઇન્દ્રિયાણિ મનોઽહન્તા બુદ્ધિર્વર્ષ્મેત્યમૂનિ ચ ।
કાર્યાણિ વિદ્ધ્યવિદ્યાયાસ્તતસ્તત્કારણં જહિ ।
કાર્યાણિ સ્વયમૃચ્છન્તિ પ્રણાશં કારણાત્યયે ॥ ૭॥

ઇતિ ચતુર્થોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૫ વિશ્વસ્વરૂપમ્

Chapter V - The nature of the Universe

ગુરુરુવાચ ।
નામરૂપાત્મકં ચૈતદ્વિશ્વમજ્ઞાનમૂલકમ્ ।
વિદ્ધિ તદ્વિલયં યાતિ સ્વાત્મબોધાર્યમોદયે ।
આત્મભિન્નમસદ્વિશ્વં મરીચિસ્વપ્નસન્નિભમ્ ॥ ૧॥

રજ્જ્વામધ્યાસ્યતે સર્પઃ શુક્તૌ ચ રજતં યથા ।
સ્થાણૌ ચૌરોઽભ્રવૃન્દે પૂર્મૃગતૃષ્ણાસુ ચોદકમ્ ।
ગગને નીલિમા ચૈવ બ્રહ્મણ્યારોપ્યતે જગત્ ॥ ૨॥

જલમેવ યથા ચોર્મિફેનબુદ્બુદરૂપતઃ ।
વિવર્તતે સુવર્ણં ચ કર્ણિકાવલયાત્મના ॥ ૩॥

મૃદેવમત્રકુમ્ભાદિરૂપતસ્તન્તવો યથા ।
વસ્ત્રોત્તરીયકૌપીનકઞ્ચુકાદ્યાત્મનાનઘ ।
તથા બ્રહ્મૈકમેવાત્ર વિશ્વરૂપં બિભર્તિ હિ ॥ ૪॥

ભાવયન્ત્યર્ભકા દારુદ્વિપં સત્યં હિ યૂથપમ્ ।
પ્રૌઢાસ્તુ તદસત્યત્વં જાનતે બાલિશાસ્તથા ॥ ૫॥

અનાત્મમાત્રમીક્ષન્તે કિન્તુ પશ્યન્તિ પણ્ડિતાઃ ।
કેવલં બ્રહ્મ સર્વત્ર વિવેકોઽસ્યાયમાદૃતઃ ॥ ૬॥

તત્ત્વં જાનીહિ યત્કૃત્સ્નં વિશ્વં બ્રહ્મણ્યવસ્થિતમ્ ।
માયયા તદ્બહિર્ભાતિ વપુસ્તે મુકુરે યથા ॥ ૭॥

સ્વપ્નદૃષ્ટં યથા વસ્તુ પ્રબોધે નેક્ષતે નરઃ ।
જીવન્મુક્તસ્તથા વિશ્વં બ્રહ્મજ્ઞાને પ્રતિષ્ઠિતે ॥ ૮॥

ઇતિ પઞ્ચમોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૬ મનસઃ સ્વરૂપમ્

Chapter VI The Nature of the Mind

ગુરુરુવાચ ।
સ્રષ્ટું સંહર્તુમપ્યેતન્નિમેષેણાખિલં જગત્ ।
મનઃ શક્નોત્યતો હીદં વિચારેણ જહિ દ્રુતમ્ ।
વાસનાહનનેનૈવં તચ્ચાઞ્ચલ્યજયેન ચ ॥ ૧॥

મનો હિ વાસનાપુઞ્જં બ્રુવતે તત્ત્વવેદિનઃ ।
જનયન્તિ ચ તા બન્ધં વાસનાસ્તદ્વધસ્તતઃ ॥ ૨॥

વિમુક્તિમિચ્છતાવશ્યં કાર્યઃ સર્વાત્મના ભુવિ ।
વાસનાસુ વિનષ્ટાસુ પ્રદીપ ઇવ વિન્દતે ।
ઉપભુક્તાખિલસ્નેહો મનઃ શાન્તિમનુત્તમામ્ ॥ ૩॥

યથાઽઽત્મનઃ કૃમિઃ કોશે બધ્યતેઽન્તસ્તથા નરઃ ।
સંસારાખ્યમહાજાલે સઙ્કલ્પૈર્વાસનાગણૈઃ ॥ ૪॥

ચઞ્ચલં મન એવેહ બલવાનાત્મનો રિપુઃ ।
સૃજત્યસઙ્ખ્યસઙ્કલ્પવાસનાસ્તત્સ્વવૃત્તિભિઃ ।
અતો બ્રહ્મવિચારેણ જહિ તાસ્ત્વં નિરન્તરમ્ ॥ ૫॥

દ્વૈતવૃત્તિષ્વલુપ્તાસુ બ્રહ્મ ભાતિ ન ચેતસઃ ।
અતો નાશય તાઃ સર્વા બ્રહ્મતેજોઽભિવૃદ્ધયે ॥ ૬॥

સર્વોપદ્રવયોનેશ્ચાઽહઙ્કૃતેરાસ્પદં મનઃ ।
અહઙ્કારવિનાશે તુ મનોનાશઃ પ્રસિદ્ધ્યતિ ।
મનોનાશે હ્યહઙ્કારનાશઃ સઞ્જાયતે ધ્રુવમ્ ॥ ૭॥

મમતા તવતા ચેતિ મનઃસૃષ્ટિરુભે અપિ ।
વિચારેણ હતે ચિત્તે નશ્યન્તીદૃશભાવનાઃ ।
નિબોધ વત્સ મનસઃ પ્રણાશો મોક્ષ એવ હિ ॥ ૮॥

સઙ્કલ્પનાશમેવાહુઃ સાર્થં ચિત્તલયં બુધાઃ ।
અપુનર્ભવમુત્સાદં સઙ્કલ્પાનાં મનીષિણઃ ।
અક્ષરં ભાસ્વરં ચાહુરવર્ણ્યં બ્રહ્મણઃ પદમ્ ॥ ૯॥

વિશોધ્યતે યથા હેમ પાવકેન તથા મનઃ ।
ધ્યાનાગ્નિના હિ નિર્દગ્ધં નિર્મલં તાત જાયતે ॥ ૧૦॥

ઇતિ ષષ્ટોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૭ સાધનાપ્રણાલિઃ

Chapter VII The Process of Sadhana

ગુરુરુવાચ ।
આચ્છાદ્યતે યથા વહ્નિર્ભસ્મના ચ કૃપાણકઃ ।
કોશેન ચ રવિર્મેઘૈર્ગર્ભશ્ચોલ્બેન હીરકઃ ।
મૃદા તલ્પશ્છદેનૈવં બ્રહ્મ માંસાસ્થિભિર્વૃતમ્ ॥ ૧॥

યદાપનીયતે ભસ્મ તદાગ્નિઃ સાધુ દૃશ્યતે ।
યદાભ્રાણિ નિરસ્યન્તે તદાઽઽદિત્યઃ પ્રકાશતે ॥ ૨॥

યદાપનીયતે કોશઃ કૃપાણો દૃશ્યતે તદા ।
યદાસ્તરણમુત્સૃષ્ટં તદા તલ્પો નુ દૃશ્યતે ॥ ૩॥

તથૈવાજ્ઞાનસંવારે નિરસ્તે બ્રહ્મરોધિનિ ।
બ્રહ્મબોધેન સમ્ભાસ્વદ્બ્રહ્મસાક્ષાત્કૃતિર્ભવેત્ ॥ ૪॥

દુગ્ધે ન નવનીતં ત્વં વ્યાપકં પરિપશ્યસિ ।
તદેવ લભસે કિન્તુ મથિતે પયસિ સ્વયમ્ ॥ ૫॥

તથા ન બ્રહ્મ શક્નોષિ સન્દ્રષ્ટું ચર્મચક્ષુષા ।

ધ્યાનેન દ્રક્ષ્યસિ બ્રહ્મ સર્વવ્યાપિ ત્વસંશયમ્ ॥ ૬॥

સ્વીયમાધેહિ ચિત્તં ચ નિરસ્તાખિલકલ્મષમ્ ।
અવસાદય સમ્બન્ધાન્ મનસો બાહ્યવસ્તુભિઃ ॥ ૭॥

સમૂલં જહિ કામાંશ્ચ સઙ્કલ્પાંસ્ત્યજ સર્વશઃ ।
વિનાશયાખિલાસ્તૃષ્ણા બ્રહ્મધ્યાનૈકમાનસઃ ।
અવર્ણ્યપ્રભમદ્વૈતં બ્રહ્મપીઠં તદૈષ્યસિ ॥ ૮॥

અપિ તત્ત્વમસીત્યસ્ય મહાવાક્યસ્ય તત્ત્વતઃ ।
અર્થં બુધ્યસ્વ જિજ્ઞાસો સ સ્યાન્નિઃશ્રેયસાય તે ॥ ૯॥

બ્રહ્માત્મૈક્યાનુભૂતિશ્ચ મહાવાક્યોદ્ભવા પુનઃ ।
સંસારસાગરોત્તારે તાત નૌકાયતે ખલુ ॥ ૧૦॥

સમદૃષ્ટ્યા વિવેકેન સત્સઙ્ગેન સ્થિરેણ ચ ।
ચિત્તેન ન તદ્વિચારેણ સુલભં પરમં પદમ્ ॥ ૧૧॥

યદ્ભાવયતિ ચિત્તેન નરઃ સર્વાત્મના સદા ।
તદેવ જાયતે શીઘ્રં યથા કીટો મૃદાલયે ॥ ૧૨॥

સ્થિરાસને સમાસીનો નિયમ્યેન્દ્રિયજાલકમ્ ।
પઞ્ચકોશાનતિક્રમ્ય શાન્તો ધ્યાય ચ સન્તતમ્ ॥ ૧૩।
સ્વયમ્પ્રકાશમેવાહં સચ્ચિદાનન્દકોઽદ્વયમ્ ।
બ્રહ્માસ્મ્યાધારભૂતં ચ વિશ્વકોશસમૂહયોઃ ॥ ૧૪॥

ઇત્યેવં બ્રહ્માસ્મ્યાભાવં ત્વં તૈલધારાનિભં કુરુ ।
સ્નાયન્નશ્નન્ શ્વસન્ ગચ્છન્ સ્વપન્ ક્રીડંશ્ચ સંલપન્ ॥ ૧૫॥

યાવદ્બ્રહ્માવબોધં હિ વિન્દસે તાવદાચર ।
વિચારં બ્રહ્મણોઽપ્યેવં સદ્વૃત્તમૃષિસઙ્ગતિમ્ ॥ ૧૬॥

અહમ્બ્રહ્માસ્મિવાક્યસ્ય ધ્યાયં ધ્યાયમનુત્તમમ્ ।
યદર્થં સતતં બ્રહ્માકારવૃત્તિં ચ પુષ્યસિ ॥ ૧૭॥

આત્માન્તઃકરણાચ્છુદ્ધસત્ત્વાત્તર્હિ પ્રસિદ્ધ્યતિ ।
બ્રહ્મજ્ઞાનં સ્વયં સર્વનિગમાખિલશીર્ષકમ્ ॥ ૧૮॥

ઓમિત્યેકાક્ષરં પ્રાહુઃ પ્રતીકં બ્રહ્મણઃ પરમ્ ।
તદેવ વ્યાહૃતિઃ શક્તેસ્ત્રયીસારશ્ચ વિશ્રુતઃ ॥ ૧૯॥

નિર્ભયામરતાતીરપ્રાપણે તરણિશ્ચ તત્ ।
ધ્યાયતો ભક્તિભાવેન પ્રણવં વત્સ સર્વદા ॥ ૨૦॥

અભ્યાસેનાત્મનો બ્રહ્મવિચારં સહજં કુરુ ।
તદૈવ તે મનસ્તિષ્ઠેદાત્મનો નિપુણં વશે ।
નશ્યન્તિ મનસો બ્રહ્મવિચારેણ મલાનિ હિ ॥ ૨૧॥

કોઽહં કુતો જગજ્જાતં કથં જન્મમૃતી પુનઃ ।
બન્ધમોક્ષૌ ચ કાવેવં મીમાંસામનિશં કુરુ ।
તદા હિ શાશ્વતાનન્દપદં યાસ્યસિ ચાક્ષતમ્ ॥ ૨૨॥

યદિ તે બ્રહ્મસંલિપ્સા લક્ષ્યતૃષ્ણાં વિનાશય ।
દૂરીકરોષિ ચાત્માનં વિષયેભ્યો યથા યથા ।
તથા તથા ત્વયિ બ્રહ્મતેજો વત્સ પ્રદીપ્યતે ॥ ૨૩॥

રાગદ્વેષરુષાઽહતામાનૈર્યદિ ન મુચ્યસે ।
પદ્માદ્યાસન સંવિષ્ટોઽપ્યેકાહં નૈવ શક્નુયાઃ ।
સમાધિં તર્હિ નિર્વેષ્ટં કદાપીહ નિબોધ તત્ ॥ ૨૪॥

વિલાપય વચશ્ચિત્તે ચિત્તં બુદ્ધૌ ચ શેમુષીમ્ ।
તત્સાક્ષિણિ પરાં શાન્તિમુપભુક્ષ્વ તતઃ પરમ્ ॥ ૨૫॥

સન્નિયમ્યેન્દ્રિયગ્રામં સદોદ્યદ્ભાવનાં જહિ ।
નિમજ્જય મનોઽન્તસ્થે બ્રહ્મણ્યેવમતન્દ્રિતઃ ।
યેનાનુભવિતું સ્વસ્ય બ્રહ્મણૈક્યં ત્વમર્હસિ ॥ ૨૬॥

ચતુઃસાધનસમ્પત્યા યુક્તો વાચં નિયમ્ય ચ ।
સંહૃત્ય સકલા આશાઃ શ◌ૃણુ વેદસરસ્વતીમ્ ।
વિચિન્તય શ્રુતં સમ્યગ્ધ્યાયંશ્ચૈહ્યાત્મવેદનમ્ ॥ ૨૭॥

નિર્વિકલ્પે સમાધૌ હિ સુબોધં બ્રહ્મ નિશ્ચિતમ્ ।
બ્રહ્મણ્યેવ વિલીને સ્યાત્સમાધિઃ શુદ્ધમાનસે ॥ ૨૮॥

પરે બ્રહ્મણિ વિજ્ઞાતે નિર્વિકલ્પસમાધિના ।
ભિદ્યતે હૃદયગ્રન્થિઃ કામોઽવિદ્યા ચ કર્મ ચ ॥ ૨૯॥

વિના સમ્પૂર્ણવૈરાગ્યાત્સમાધિસ્તે ન સિદ્ધ્યતિ ।
સમાધિં ચાત્મનો બોધો વિના તે નૈવ જાયતે ।
અન્તરા ચાત્મસંવેદં સમ્યઙ્મોક્ષો ન સિદ્ધ્યતિ ॥ ૩૦॥

ઇતિ સપ્તમોऽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૮ જ્ઞાનાજ્ઞાનસ્વરૂપમ્

Chapter VIII Ignorance and Wisdom

ગુરુરુવાચ ।
અહં કાયો મદીયોऽયં દેહશ્ચેયં સતી મમ ।
પુત્રોऽસૌ મે ચ વિપ્રોऽહં સ્થૂલોऽહં પણ્ડિતોऽપ્યહમ્ ।
કૃષ્ણોऽહમિતિ મન્યેત યઃ સ બદ્ધોऽજ્ઞ એવ ચ ॥ ૧॥

નાહં દેહસ્ત્વહં સર્વવ્યાપ્યમયોऽવિકાર્યહમ્ ।
અખણ્ડશ્ચ સ્વતન્ત્રોऽસ્મિ સચ્ચિદાનન્દ એવ ચ ॥ ૨॥

સ્વયમ્ભૂર્બ્રહ્મ ચાસ્મીતિ યો ભાવયતિ તત્ત્વવિત્ ।
સ જ્ઞાની ચ મહર્ષિશ્ચ સ મુક્તો ભવબન્ધનાત્ ॥ ૩॥

કર્માકાર્ષમિદં ચાહં સોऽહં યામિ સુરાલયમ્ ।
ઉપાભુજીદૃશાન્ ભોગાન્ ઇતિ યો વેત્તિ સોऽબુધઃ ॥ ૪॥

નાહં કર્તા ન ભોક્તાપિ સાક્ષી કેવલમસ્મિ તુ ।
કરોતિ પ્રકૃતિઃ કર્મેત્યાહ યઃ સ ઋષિર્બુધઃ ॥ ૫॥

ઇતિ અષ્ટમોऽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૯ પઞ્ચકોશઃ

Chapter IX The Five Sheaths

ગુરુરુવાચ ।
અસાવન્નમયઃ કોશઃ પઞ્ચભૂતાત્મકઃ સ્મૃતઃ ।
આદ્યન્તવાન્ જડઃ કાર્યસ્તત્ત્વં ન પ્રાણકોશકઃ ॥ ૧॥

મલસાન્દ્રોऽપ્યતો ન ત્વં કોશોऽયં પાર્થિવાઙ્ગભૃત્ ।
ત્વમસ્ય વર્ષ્મણઃ સાક્ષી તદ્રહસ્યમિદં શ૱ૃણુ ।
નાહં શરીરમેવાસ્મિ બ્રહ્માહં કેવલં ત્વિતિ ॥ ૨॥

અથ પ્રાણમયઃ કોશો રજોગુણસમુદ્ભવઃ ।

આગન્તવાન્ જડ કાર્યસ્તત્ત્વં ન પ્રાણકોશકઃ ॥ ૩॥

અસ્ય કોશસ્ય સાક્ષી ત્વં તદ્રહસ્પમિદં શૃણુ ।
નાહ પ્રાણમયઃ કોશો બ્રહ્માહં કેવલં ત્વિતિ ॥ ૪॥

યોઽયં મનોમયઃ કોશઃ સ ચ સત્વગુણોદ્ભવઃ ।
આદ્યન્તવાન્ જડઃ કાર્યસ્તત્ત્વં નૈવ મનોમયઃ ॥ ૫॥

અસ્ય કોશસ્ય સાક્ષી ત્વં તદ્રહસ્યમિદં શૃણુ ।
નાહં મનોમયઃ કોશો વહ્માહં કેવલં ત્વિતિ ॥ ૬॥

યો વિજ્ઞાનમયઃ કોશઃ સોઽપિ સત્ત્વગુણોદ્ભવઃ ।
આદ્યન્તવાન્ જહઃ કાર્યસ્ત્વં વિજ્ઞાનમયો ન તત્ ॥ ૭॥

અસ્ય કોશસ્ય સાક્ષી ત્વં તદ્રહસ્યમિદં શૃણુ ।
નાહં વિજ્ઞાનકોશો હિ બ્રહ્માહ કેવલં ત્વિતિ ॥ ૮॥

ય આનન્દમયઃ કોશઃ સ ચ પ્રકૃતિસમ્ભવઃ ।
અવિદ્યાકર્મજન્યોઽપિ વ્યભિચારિગુણાન્વિતઃ ॥ ૯॥

જડશ્ચાયં ત્વમાનન્દકોશો નૈવ ભવસ્યતઃ ।
અસ્ય કોશસ્ય સાક્ષી ત્વં તદ્રહસ્યમિદં શૃણુ ।
નાહમાનન્દકોશોઽપિ બ્રહ્માહં કેવલં ત્વિતિ ॥ ૧૦॥

ઇતિ નવમોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૧૦ જીવનમુક્તિરવસ્થા

Chapter X The State of Jivanmukti

ગુરુરુવાચ ।
પદેઽક્ષરે તુરીયે યો જીવન્મુક્તઃ પ્રતિષ્ઠિતઃ ।
સુખદુઃખાદિભિર્દ્વન્દ્વૈર્ન કદાપિ સ પીડ્યતે ॥ ૧॥

આત્મીયસચ્ચિદાનન્દસ્વરૂપેઽનારતં સ હિ ।
વિશ્રામ્યાતિતરામેવં સુખેનાત્મેચ્છયાટતિ ॥ ૨॥

શરીરત્રિતયાત્કોશપઞ્ચકાદપ્યહં પરઃ ।
અવસ્થાત્રયસાક્ષી ચ શુદ્ધચૈતન્યકેવલઃ ।
ઇત્યેવ સાધુસંવિત્તે જીવન્નપિ વિમુક્તિભાક્ ॥ ૩॥

આત્મૈવ સર્વભૂતાનીત્યેવં યસ્તુ વિજજ્ઞિવાન્ ।
જીવન્મુક્તસ્ય તસ્યર્ષેર્મોહઃ શોકો ન કોઽપિ વા ।
ન વિદ્યતે દ્વિતીયોઽપિ યતસ્તસ્ય મહાત્મનઃ ॥ ૪॥

નિર્દગ્ધસર્વકામો યો નિહતાહઙ્કૃતિર્યતિઃ ।
અરૂપભેદદૃક્ શાન્તઃ સર્વભૂતેષુ યઃ સમઃ ।
માયાઽજ્ઞાનતમોમુક્તઃ સ પરં ભાસતે મહાન્ ॥ ૫॥

જીવન્મુક્તઃ સદાનન્દે પરબ્રહ્મણ્યવસ્થિતઃ ।
નિરુદ્ધચિત્તવૃત્તિશ્ચ સ્ફટિકસ્વચ્છમાનસઃ ।
સોઽહન્ત્વમ્ભેદભાવૈશ્ચ નોપલિપ્તઃ કદાચન ॥ ૬॥

વિમુક્તો યો યતીન્દ્રશ્ચ જિતાજ્ઞાનમહારિપુઃ ।
સદાનન્દરહસ્યજ્ઞઃ સ કરાર્પિતભૈક્ષ્યભુક્ ।
મૂલેષુ શાખિના ચાપિ સ્વપિત્યાનન્દનિર્ભરઃ ॥ ૭॥

સ મહર્ષિર્ન લોકસ્ય સ્તુતિનિન્દે સમીક્ષતે ।
યસ્યાપિ તાડ્યમાનસ્ય શાન્તમેવ મનઃ સ્થિતમ્ ॥ ૮॥

અનુગૃહ્ણતિ યઃ પાપાનાત્મપીડાકરાન્મુદા ।
સર્વત્ર કેવલં સ્વીયમાત્માનં ચાનુપશ્યતિ ॥ ૯॥

યસ્ય દુઃખેષ્વનુદ્વિગ્નં સુખેષ્વપ્રમદોજ્જ્વલમ્ ।
મનશ્ચ સોઽપ્યસન્દેહં જીવન્મુક્તઃ પ્રકીર્ત્યતે ।
મનસ્તસ્ય પ્રશાન્તં ચ બ્રહ્માત્મૈક્યાનુભાવતઃ ॥ ૧૦॥

જીવન્મુક્તો હિ સંસ્કારરૂપં જાનાતિ વિગ્રહમ્ ।
વિદેહમુક્તિભાગન્યો નેતિ ભેદં નિબોધ તમ્ ॥ ૧૧॥

ઇતિ દશમોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૧૧ બ્રહ્મોપદેશઃ

Chapter XI Brahma-Upadesha

ગુરુરુવાચ ।
ન ત્વં ક્ષરમિદં ગાત્રં નાપીદં ચઞ્ચલં મનઃ ।
નાપીન્દ્રિયાણિ બુદ્ધિર્નો નાપિ કારણવિગ્રહઃ ।

ત્વં વ્યાપકાક્ષરં બ્રહ્મેતીદં બુદ્ધ્વૈધિ મુક્તિભાક્ ॥ ૧॥

ત્વં પ્રજ્ઞાનઘનો હ્યાત્મા બ્રહ્મ ત્વં ચિદ્ઘનં તથા ।
ત્વમાનન્દઘનશ્ચાત્મા ત્વં વિજ્ઞાનઘનઃ પુમાન્ ।
અનુબુધ્ય પરં તત્ત્વમેતચ્ચ ભવ મુક્તિભાક્ ॥ ૨॥

અખણ્ડૈકરસં બ્રહ્મ ત્વં ચ ચિન્માત્રપૂરુષઃ ।
અલિઙ્ગસ્ત્વમનઙ્ગાત્મા ત્વમરાગો નિરઞ્જનઃ ।
અનુભૂય પરં તત્ત્વમેતચ્ચ ભવ મુક્તિભાક્ ॥ ૩॥

દેશકાલાતિગસ્ત્વં ચાનાદ્યન્તોઽગશ્ચ નિઃસ્પૃહઃ ।
અવિકાર્યમરોઽકર્મા ત્વમેવ બ્રહ્મ કેવલમ્ ।
સંવિજ્ઞાય પરં તત્ત્વમેતચ્ચ ભવ મુક્તિભાક્ ॥ ૪॥

અભેદ્યસ્ત્વમનંશો ચ નિર્જન્મમરણોઽવ્યયઃ ।
સ્વતન્ત્રસ્ત્વં સ્વયઞ્જ્યોતિરમેયસ્ત્વં સનાતનઃ ।
એતબુદ્ધ્વા પરં તત્ત્વં વિમુક્તિં નિર્વિશાનઘ ॥ ૫॥

ત્વમાનન્દમયઃ સાક્ષાત્પુરુષો બ્રહ્મ ચિન્મયમ્ ।
જ્યોતિર્મયસ્ત્વમાત્મા ચ બુદ્ધ્વેદં ભવ મુક્તિભાક્ ॥ ૬॥

કાયત્રયાચ્ચ ભિન્નસ્ત્વમન્યસ્ત્વં કોશપઞ્ચકાત્ ।
અવસ્થાત્રયસાક્ષી ત્વમેતબુદ્ધ્વૈધિ મુક્તિભાક્ ॥ ૭॥

દોષક્ષયવિનિર્મુક્તો ભેદરોગવિવર્જિતઃ ।
અજરાપરિણામસ્ત્વં ચૈતબુદ્ધ્વૈધિ મુક્તિભાક્ ॥ ૮॥

સર્વેષામન્તરાત્મા યચ્ચાનાદ્યક્ષરમવ્યયમ્ ।
અમેયં પરમં વસ્તુ બ્રહ્માવાઙ્મનસાસ્પદમ્ ।
તદ્બ્રહ્મૈવ ત્વમસ્યઙ્ગ ધ્યાયંસ્તન્મુક્તિભાગ્ભવ ॥ ૯॥

ઇતિ એકાદશોઽધ્યાયઃ સમ્પૂર્ણઃ ।

## ૧૨ આત્માનુસન્ધાનમ્

Chapter XII Realisation of the Self

ગુરુરુવાચ ।
કચ્ચિદ્વિનષ્ટો મોહસ્તે કચ્ચિત્તે ગલિતં ભયમ્ ।

સામ્પ્રતં વત્સ સન્દેહો નિરસ્તઃ કચ્ચિદેવ તે ॥ ૧॥

કચ્ચિત્ત્વં સચ્ચિદાનન્દસ્વરૂપે હ્યવતિષ્ઠસે ।
ઇદાનીમાત્મનો યસ્માદ્રહસ્યં પરમં મયા ।
વેદાન્તસ્ય તવાખ્યાતં સારભૂતં ત્રયીનિધેઃ ॥ ૨॥

શિષ્ય ઉવાચ ।
ભગવન્નધુનાત્માનં ગુરો જાનામિ નિશ્ચિતમ્ ।
અહમેવ સ્વયઞ્જ્યોતિરદ્વયં ચાવિકારિ ચ ॥ ૩॥

અરૂપં શાશ્વતં વિશ્વવ્યાપકં કેવલં વિભો ।
અખણ્ડૈકરસં બ્રહ્મ તેજોરૂપમહં પરમ્ ॥ ૪॥

બ્રહ્માહં સચ્ચિદાનન્દં શુદ્ધોઽહમમરોઽવ્યયઃ ।
અમેયો નિર્ભયોઽકાલો વિરક્તો ગતિવર્જિતઃ ।
અદેહચિત્તસમ્બન્ધો નિષ્કર્માહમતીન્દ્રિયઃ ॥ ૫॥

નમસ્તે ભગવત્પાદ ત્વયાહં પરિરક્ષિતઃ ।
સંસારચક્રતો ઘોરાત્ ત્વત્પ્રસાદેન શાશ્વતઃ ॥ ૬॥

આનન્દશ્ચામૃતત્વં ચ સંસિદ્ધમધુના પ્રભો ।
સન્દેહાજ્ઞાનસમ્મોહાઃ સર્વે મે વિલયં ગતાઃ ।
પ્રણામાઃ કોટિશઃ સન્તુ ભગવસ્તે દયાનિધે ॥ ૭॥

ગુરુરુવાચ ।
ય ઇમાં મોક્ષગીતાં ચ નિત્યમેકાગ્રમાનસઃ ।
પ્રયતશ્ચ યુતો ભક્ત્યા પઠનેવાનુતિષ્ઠતિ ॥ ૮॥

ઉપદિષ્ટાનિ સર્વાણિ સોઽમૃતત્વં વ્રજેલ્લઘુ ।
આનન્દં શાશ્વતં ચાપિ પરમાં શાન્તિમવ્યયામ્ ।
યત્રાસ્તે બ્રહ્મજિજ્ઞાસા તત્ર સ્યુઃ શાન્તિસમ્પદઃ ॥ ૯॥

ઇતિ દ્વાદશોઽધ્યાયઃ સમ્પૂર્ણઃ ।

ઇતિ સ્વામી શિવાનન્દવિરચિતા અદ્વૈતવેદાન્તતત્ત્વજ્ઞસારદર્શકા
મોક્ષગીતા સમાપ્તા ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Thus ends Moksha Gita which gives the essence of

the Advaita Vedanta Philosophy.

Hari OM Tat Sat!

OM Shanti! Shanti!! Shanti!!!

Encoded and proofread by PSA Easwaran

---

*Moksha Gita*

pdf was typeset on August 17, 2022

Please send corrections to *sanskrit@cheerful.com*